रेणुकास्तोत्रम्

{॥ रेणुकास्तोत्रम् ॥}

श्रीगणेशाय नमः ।

पाकामृतांशुमकुटाभरणा भवानी

शोकापहा नतजनस्य शुभाखिलाङ्गी ।

कोकाकृतिस्तनभरा कुशलानि नित्यं

मूकाम्बिका मम तनोतु मुनीन्द्रवन्द्या ॥

श्लोकस्याद्यन्तयोर्वाग्भवमुच्चार्य पठेदिति सम्प्रदायः ॥ ॐ॥

कालाग्न्यादि शिवावसानमखिलं ते गुल्फदघ्नं शिवे

मूर्तिं कीर्तयितुं न कस्य रसना लज्जाम्बुधौ मज्जति ।

तस्मात् त्वच्चरणैकदेशनखरज्योतिःस्फुलिङ्गा इव

स्फूर्जन्ति प्रभविष्णवश्च सततं ते पद्मनाभादयः ॥ १॥

कल्पः कोऽपि स शाम्भवो विजयते मातस्त्वया कल्पितो

यत्रानल्पविकल्पजालविमुखः कश्चिद्विपश्चित् परः ।

सा त्वं सत्त्ववतामपीह सुलभा नैवासि किं स्तूयसे

स्वच्छन्दं शिशवो यथा तव पुनः क्रीडन्ति वेदा इमे ॥ २॥

लीलाचामरधारिणीसहचरीगत्या महासिद्धयो

नूनं वञ्चयितुं स्फुरन्ति भवतीकारुण्यशून्यं जनम् ।

अम्ब त्वन्नयनाञ्चलं करुणया यस्मिन् परिक्रीडते
तस्य द्वारि निवारितोऽपि कुरुते सेवां सुराणां गणः ॥ ३॥

आ पातालतलात् फणीश्वरशिरोरत्नांशुनीराजिता-
दा सर्वज्ञनिकेतनादपि शिखायौतांशुधौताङ्कणात् ।
एकच्छत्रमवाप्य वैभवमहो दीव्यन्ति ते सन्ततं
ये सन्ध्याचलनिश्चलं तव पदं ध्यायन्ति गायन्ति च ॥ ४॥

ये त्वामम्ब पलाशबिल्वकुसुमैरुल्लासिभिर्मल्लिका-
पुष्पैर्वा वनमल्लिकाविरचितैरुद्दामभिर्दामभिः ।
मुग्धोन्मीलितमालतीभिरभितः सम्पूजयन्त्यादरात्
तेषामुद्धृतसौरभा प्रतिदिनं व्याजृम्भते भारती ॥ ५॥

त्वां सह्याचलमौलिसुस्थितपदां श्री-एकवीराम्बिके
ये लिम्पन्ति सचन्द्रचन्दनरसैस्तेषां सुधास्राविणी ।
वाणीविस्मयवर्ण्यमानगिरिशव्यालोलगङ्गाजल-
स्वच्छन्दोर्मिपरम्पराविजयिनी वाणी नरीनृत्यति ॥ ६॥

ये त्वां ब्राह्ममुहूर्तनिर्मलधियस्त्वाधारतश्चिन्तय-
न्त्यूर्ध्वं मूर्ध्नि सरोरुहेऽतिधवले पीयूषधारावृते ।
ते मृत्युं सहसा विजित्य रचयन्त्युच्चैर्गतिं नित्यशः
प्रत्यादिष्टपुरःसुधाकरसुधाहम्भावसम्भाविताः ॥ ७॥

यस्त्वां पश्यति तस्य नश्यति महापापान्धकारः क्षणात्
किं चार्धादपरे पुराणपुरुषप्राणप्रिये पार्वति ।
मूर्ध्नस्तस्य ततो भवेत् कृतधियः श्री-एकवीराम्बिके
दृश्यन्ते न मनागपीह यदियं प्रत्यक्षमुद्योतसे ॥ ८॥

किं योगेन किमर्चनेन किमथ ज्ञानेन किं कर्मणा
किं ध्यानेन किमिज्यया किमथवा दानेन किं दीक्षया ।
दृश्यन्ते यदि सह्यशैलशिखरश्रीगर्विताः सर्वदा
मातः पार्वति रेणुके तव पदाम्भोजप्रभाविभ्रमाः ॥ ९॥

हे सह्याचलनित्यकेलिरसिके कर्पूरकस्तूरिका-
विन्यस्तागरुकुङ्कुमैर्मलयजैस्त्वं चर्चिताभ्यर्चिता ।
ते दीव्यन्ति सुरेन्द्रमुख्यविबुधश्रेणीकिरीटस्फुर-
न्माणिक्यप्रतिबिम्बितारुणपदस्थाः सम्प्रदाः सम्पदाम् ॥ १०॥

हे सह्याद्रिविनिद्रलिङ्गवपुषि श्री-एकवीराम्बिके
त्वां कृष्णागरुगुग्गुलुप्रभृतिभिर्ये धूपयन्त्यादरात् ।
ते कैलासनिवासिनीभिरभितः सञ्चारितैश्चारुभि-
र्लीलाचामरमारुतैश्चिरतरं नन्दन्ति रुद्रा इव ॥ ११॥

मातः शाम्भवि जृम्भितामृतशिलालिङ्गात्मिके रेणुके
त्वां सह्याद्रिशिरोविहारसुलभां नीराजयन्त्यादरात् ।

ते वृन्दारकवृन्दवन्दितपदाश्चन्द्रार्कचूडामणि-
ज्योतिर्मेदुरमन्दिराङ्कणभुवो भूतिं लभन्तेऽद्भुताम् ॥ १२॥

दूरादङ्गणरङ्गसङ्गतरजोराजीविराजद्वपु-
स्तुभ्यं यः प्रणिपत्तिमम्ब कुरुते कश्चित् कदाचित् क्वचित् ।
सम्प्राप्य श्रियमिन्दुसुन्दरयशःसन्दोहनिष्यन्दिनी-
मन्ते निर्विषयं स्वयं प्रविशति श्रीशाम्भवं वैभवम् ॥ १३॥

त्वामुद्दिश्य कदापि कोऽपि किमपि क्वापि प्रपद्यन् नरो
भक्त्यावेशवशीकृतो जपति वा यो यज्जुहोत्यादरात् ।
तत् तस्याक्षयमेव देवि भवति स्वर्गापवर्गप्रदं
त्वन्नामस्मरणं गतो विजयते सर्वोऽपि शर्वो जनः ॥ १४॥

मातस्त्वच्चरणेन यास्यति चिरं रुद्रोऽपि भद्राशय-
श्चूडाचन्द्रकलामरीचिनिचयैराचान्तरत्नासनैः ।
तत्त्वानामुपरि स्थितो विजयते वामादिभिर्नामभिः
श्रीकामेश्वरि दक्षपुत्रि गिरिजे त्वं रेणुके रक्ष माम् ॥ १५॥

मातर्भैरवि भर्गपत्नि गिरिजे गायत्रि गोत्रात्मिके
दुर्गे गौरि सरस्वति त्रिणयने श्रीसिद्धलक्ष्मी धृते ।
नित्ये मृत्युविकारहारिणि शिवे श्री-एकवीराम्बिके
सोऽहं ते शरणागतः करुणया त्वं रेणुके रक्ष माम् ॥ १६॥

इति श्रीरेणुकास्तोत्रं समाप्तः ॥

पाकामृतांशुमकुटाभरणा भवानी

शोकापहा नतजनस्य शुभाखिलाङ्गी ।

कोकाकृतिस्तनभरा कुशलानि नित्यं

मूकाम्बिका मम तनोतु मुनीन्द्रवन्द्या ॥

श्लोकस्याद्यन्तयोर्वाग्भवमुच्चार्य पठेदिति सम्प्रदायः ॥ ॐ॥

Encoded and proofread by Sridhar Seshagiri sridhar.seshagiri at gmail.com

Reencoded independently by Kaushal S. Kaloo kaushalskaloo at gmail.com

From Stotrasamuccaya, A Collection of Rare and Unpublished Stotras, Vol 1,

Ed.

Pandit K. Parameshwara Aithal, Introduction by Dr. V. Raghavan, Adyar Library

Center, 1969

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Renuka Stotram 1 (By Vishnu Das) Lyrics in Devanagari PDF
% File name : reNukAstotram.itx
% Location : doc_devii
% Author : Vishnudas

% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com, Kaushal S. Kaloo kaushalskaloo at gmail.com
% Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Description-comments : reNukAstotram from stotrasamuccaya Aithal 1969
% Latest update : June 22, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website